# U.G. 3rd Semester Examination - 2019

## SANSKRIT

### [HONOURS]

### Course Code : SANH-CC-T-V

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. सरल-सुरगिरा देवनागरीलिप्या च यथेच्छं **दश**-प्रश्ना: समाधेया: : 2×10=20

i) क: आसीत् यौगन्धरायण: ? स्वप्नवासवदत्तं नाटके विदूषकस्य नाम किमासीत् ?

ii) ''प्रद्वेषो बहुमानो वा संकल्पादुपजायते''—कोऽस्य वाक्यस्य वक्ता ? कस्मिन् प्रसङ्गे इदमुक्तवान् ?

iii) ''यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्''—कं प्रति कस्य उक्तिरियम् ? क: स्वप्न: तेन दृष्ट: ?

iv) का आसीत् पद्मावती ? उदयनस्य वीणाया: नाम किमासीत् ?

v) 'अभिज्ञानशकुन्तलम्' नाटके उल्लिखिनानि शिवस्य अष्टौ नामानि लिख्यन्ताम्।

vi) 'अभिज्ञानशकुन्तलम्' नाटके नान्दीश्लोके व्यवहृतं छन्दोनाम लिख्यताम्।

*[Turn Over]*

Scanned by CamScanner

vii) ''सरसिजमनुविद्धं शैवलेनापि रम्यम्''—कं प्रति कस्य उक्तिरियम्? सरसिजमत्र केन सह उपमीयते?

viii) सूत्रधार-नटोपदयोः लक्षणं निरुपनीयम्।

ix) 'अभिज्ञानशकुन्तलम्' नाटकस्य नान्दीश्लोकं लिखतु।

x) धीवरवृत्तान्तं अभिज्ञानशकुलनाटके कस्मित् अङ्क दृश्यते?

xi) का हंसपदिका? देवराजेन्द्रस्य सारथेर्नाम किमासीत्?

xii) यौगन्धरायणः वासवदत्तां कस्य समीपे किमर्थं न्यस्तं कृतवान्?

xiii) 'समुद्रगृह' विषये किञ्चित् लिखतु।

xiv) 'अभिज्ञानशकुन्तलम्' नाटकस्य द्वयोः रक्षिपुरुषयोः नाम लिखतु।

xv) 'कुलपति'—शब्दस्य कोऽर्थः?

2. Answer any **four** of the following questions in Sanskrit or Bengali or English: 5×4=20

i) Translate into Bengali or English (any **one**):

a) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुत्तरं स्तोकमूर्व्यां प्रयाति।।

b) नीवाराः शुकगर्भकोटरमुखभ्रष्टास्नारूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिरणानिस्यन्दरेखाङ्किताः।।



Scanned by CamScanner

ii) Translate into Bengali or English (any **one**):

a) तीर्थेदिकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयन्तु तपोधनानि।
धर्मप्रिया नृपसुता न हि धर्मपीडा-
मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः।।

b) कस्यार्थः कलसेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।
आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया
यद् यस्यास्ति समीप्सितं वदतु तत् कस्यादय किं दीयताम्।।

iii) कालिदासकृतस्य विक्रमोर्वशीयनाटकस्य विषयवस्तु तथा नाट्यवैशिष्ट्यादिकमालोच्येताम्।

iv) संक्षेपेण टीकां रचयतु : (any **one**):

a) विशाखदत्तः

b) स्वप्नवासवदत्तम्

c) शूद्रकः

v) Quote the song of हंसपदीका in Sanskrit version with its meaning in Bengali or English.

vi) Discuss in brief लावाणक-वृत्तान्तः as discussed in the 1st act of the drama स्वप्नवासवदत्तम्।



Scanned by CamScanner

3. Answer any **two** of the following questions. **One** must be written in *Sanskrit* with *Devanagari* script:

10×2=20

i) a) Explain any **one** of the following in Sanskrit language with Devnagari script:

6×1=6

सप्रसंग व्याख्या क्रियताम् :

सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।

सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्।।

**OR**

अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।

जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा।।

b) Amplify the idea: 4×1=4

भावसम्प्रसारणं कुरु :

कालक्रमेण जगतः परिवर्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।।

**OR**

न प्रभातरलं ज्योतिरुदेति वसुधातलात्।।

ii) महाकवेः भासस्य नाट्यशैली विव्रियताम्।

iii) 'अभिज्ञानशकुन्तलम्' नाटकस्य कः अङ्कः त्वन्मते श्रेष्ठः— चतुर्थः पञ्चमः वा?—विचार्यताम्।

iv) भवभूतिविरचितयोः महावीरचरित–उत्तररामचरितयोः नाटकयोः विषयवस्तु संक्षेपेनालोच्यताम्।

---



Scanned by CamScanner